नं० ४८४६

नाम - सर्वदेव साधारण नित्यपूजाविधिः

कर्त्ता - ×

पत्र संख्या - १पत्रम् सं० — ×

विषय० - धर्मशास्त्रम्

सर्वदेवसाधारणनित्यपूजाविधिः

४९४६

4946

#1407 Missing

F. =1

ॐ

ॐ नित्यपूजाविधिं सर्वदेवसाधारणं ब्रुवे ब्राह्मे मुहूर्ते उत्थाय कृत्वा शौचादिकं सुधीः परिधायाम्बरं
शुद्धं मन्त्रस्नानं विधाय च प्रविश्य देवतागारं ॐ यं मार्जनलेपने मंगलारात्रिकाकृत्वा निर्माल्यमपसार
येत् दद्यात्पुष्पाञ्जलिं दत्त्वा धावनाचमने अपि नमस्कृत्वासने शुद्धे उपविश्य गुरुं स्मरेत् शिरस्थ
शुक्लपद्मस्थं प्रसन्नं द्विभुजान्वितं सदेहं ब्रह्मास्मि सद्रूपं नित्यमुक्तो न शोकभाक् गुरुदेवात्मना
मित्यमेकं संस्मृत्वा च ये नुते त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव प्रातः समु
त्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे नि
वृत्तिः केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि एतच्छ्लोकद्वयेनेष्टदेवताप्रा
र्थयेद्बुधः श्रीनाथ विष्णोऽस्यानेन कार्यं ॐ ह्रीं सर्वदेवते देवतागणनामोनि स्मरन् स्नानमथोच्य
ते स्नानमान्तरबाह्याख्यं द्विविधं कथितं बुधैः सूर्यकोटिप्रतीकाशं निजभूषायुधैर्युतं शिरस्थ
चरस्मरेद् देवं तत्पादोदकधारया विशन्त्या ब्रह्मरन्ध्रेण निजदेहं विशुद्धये प्रक्षालितं गतं पापं विरजा
जायते नरः ११ एवं कृत्वान्तरस्नानं स्नायाद् देहोक्तमार्गतः अघमर्षणसूक्तं च स्मरेद् दत्तजले शुचिः
मन्त्रस्नानं ततः ॐ यां जपप्रकारोऽधुनोच्यते प्राणानायम्य मूलेन कृत्वान्यासं षडङ्गकं आदित्य
मण्डलात्तीर्थान्याह्वयेत् साङ्कुशमुद्रया मन्त्रत्रयेण तु मध्ये लिख्यते तन्मन्त्रत्रयं ब्रह्माण्डोदरतीर्था
नि करैः स्पृष्टानि ते रवे तेन सत्येन मे देव देहि तीर्थं दिवाकर १५ गंगे च यमुने चैव गोदावरि सरस्व
ति नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि प्रदि

ग्रं गंगेन मस्तके सर्वतीर्थसमन्विते ततो वमिति बीजेन योजयेत्तानि तज्जले अमृतमेकेन तु मण्डलानि तत्र
संचिंतयेत्ततः मंत्रयेत्तेन बीजेन रविवारं ततो जलं कवचेनावगुण्ठ्याथ रक्षेदस्त्रेण तत्पुनः मूलमं
श्री त्रेणाष्टवारमभिमंत्र्य नमेज्जलं मंत्रेणावक्ष्यमाणेन देवतामनसि स्मरन् २ आधारः सर्वभूतानां
८ विष्णोरतुलतेजसः तद्रूपाश्च ततो जाता आपस्ताः प्रणमाम्यहं मत्रोज्जले स्मरेत्तत्र मूलेच देवता
स्मृति उन्मज्यास्मिन्नेतेन समं कृत्वा कलशमुद्रया मूलेनाथ पञ्चमंत्रैरभिषिंचेन्निजां तनुं लिख्यंतेते
थ चत्वारो मंत्राः शंकरभाषिताः सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रः प्रजापतेः मातरः सर्वभूतानां
मापो देव्यः पुनंतु मां अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता क्षालयंति निजस्पर्शादापो देव्यः
पुनंतु मां यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ललाटे कर्णयोरक्ष्णोरापःस्नाः पान्तु वो नमः
आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं संतोषः क्षान्तिरास्तिक्यं विद्या भवन्तु वो नमः विष्णुपा
दोदकं पीत्वा शालिग्रामशिलाजलं शंखे विनिक्षिप्य भ्राम्य प्रक्षिपेन्निजमस्तके ततो देवान्मनु
ष्यांश्च संतर्पयेत्पितॄन् वस्त्रं संपीड्य संत्यज्य स्वक्षिनीवाससी धरेत् तीर्थाभावात्स्वस
दने स्नायादुष्णेन वारिणा अल्पा एव प्रवक्तव्या स्नानमंत्रा यथोचिताः २ हस्तमात्रमपस्यादाय
कुर्यात्तत्राघमर्षणं भस्मना गोरजोभिर्वा स्नायान्मंत्रेण वा द्वमः ततश्चाचम्य पीठस्थस्तिलकं
रचयेत्सुधीः केशवाद्यभिधानैस्तु स्थलेषु द्वादशस्वपि ललाटोदरहृत्कण्ठदक्षपार्श्वस
के ततः वामपार्श्वांसकण्ठे च पृष्ठे दशी ककुद्यपि ललाटे त्वगदाऊर्ध्वयाद्दृश्यनेदकं पुनः ॥ ८